# षष्ठम् प्रकरणम्

# वेदेषु आधुनिकसमाजव्यवस्थायाः विचाराः

६.१ वेदेषु विश्वशान्त्यै आधुनिकविचाराः ।

६.२ द्युतक्रीडानिषेधद्वारा मानवकल्याणस्य सामाजिकविचारः ।

६.३ अतिथिसत्कारद्वारा सामाजिकविचारः ।

६.४ मूल्यवादि समाजव्यवस्था ।

६.५ साम्यवादि समाजव्यवस्था ।

६.६ ज्ञानविज्ञानादिभिः आधुनिकदिशानिर्देशः ।

६.६.१ कृषिविज्ञानम् ।

६.६.२ पशुपालनेनार्थोन्नतिः ।

६.६.३ यन्त्रविज्ञानेन विकासः ।

६.६.४ वेदेषु आयुर्विज्ञानम्

# षष्ठम् प्रकरणम्

# वेदेषु आधुनिकसमाजव्यवस्थायाः विचाराः

## ६.१ वेदेषु विश्वशान्त्यै आधुनिकविचाराः ।

संसारेऽस्मिन सर्वेषाञ्जनानामियमेव कामना जार्गर्ति यत्सर्वदा सर्वथा च सर्वत्र शान्तेः साम्राज्यम्भवेदिति, सर्वविद्या समुन्नतिः शान्तिमेव समुपजीव्य भवितुमर्हति, न हि शान्ति विरहिते समये सुखस्य कल्पनाऽपि समुदेष्यति । प्राचीनेतिहासस्य पर्यालोचनेन इदमेव निश्चितं विज्ञायते यद् यदा यस्मिन् राष्ट्रे शान्तिसुधावर्षा भवति, तदैव तत्र राष्ट्रसुखशाखी स्वच्छायया जनानां सन्तापम्परिहरन् तान् प्रमोदयति ।

दृते दृदहमा मित्रस्य मा चक्षुषा सर्वाणि भूतानि[१]
समीक्षन्ताम् । मित्रस्याहं चक्षुषा सर्वाणि भूतानि
समीक्षे । मित्रस्य चक्षुषा समीक्षा महे ॥
यजु.३६/१६

ऋचायामस्यां ऋषिः निगदति यहहं सर्वान् मानवान् सर्वान् प्राणिनश्च मित्रधिया दृशा च पश्यामि, यथाऽहं मित्रदृष्ट्या दृश्यमानो मानवः कौटिल्यं परित्यज्य सारल्यं सारस्यञ्च हृदिनिधाय द्वेषभावमपाकुर्वन् मित्रवदाचरति । वैदिक-ज्ञान-विज्ञानरताः जनाः यत्र विश्वं भवत्येकरूपम्, अनुसृत्य सर्वेषु मानवेषु स्वत्वं प्रकटयन्ति तथा च उपनिषदां सर्वभुतान्तरात्मा, स्पटीकुर्वन्ति यद् विश्वस्यास्य सर्वे प्राणिन एकस्यैव परमात्मनः सन्ततिः, अर्थात् वयं सर्वेऽमृतस्य पुत्राः ।

---

१. यजुर्वेद-३६/१६

ये मानवा आत्माभ्युदयेन साकं पराभ्युदये रुचिं वितन्विन्ति सदा समाजे तेषां मूल्याङ्कनं वैशिष्ट्यमभ्युपैति । समेषां प्राणिनां मानवानां वा कष्टाने स्वकीयं कष्टमनुभवन् तथा च सर्वेषां प्राणिनामात्मानं स्वात्मवद् अवगच्छन् एतत् तु वैश्विक मानवीय मानक एवैष यजुवदीयः सन्देशः –

यस्तु सर्वाणि भूतान्यात्मन्येवानु पश्यति ।[१]
सर्वभुतेषु चात्मानं ततो न विचिकित्सति ॥

यजु.४०/६

वेदेषु सांमनस्यसङ्गठस्यादि सुक्तयः बहुप्रसिद्धाः तथा च विभिन्नेषु मन्त्रेषु सुक्तेषु ग्रन्थेषु वा प्रकीर्णतः मानवीयसिध्धान्ताः अवधारणायाश्च संस्थापिताः ।

पुमान् पुमांसं परिपातु विश्वतः ।[२]
ऋग्वेद(६, ७५, २८)

इत्यस्मिन् मन्त्रे सर्वान् विश्वजनान् प्रचादयति यद् विश्वमञ्चे परस्परं यथाशक्यं साहाय्यं कुरु इति सार्वभौमिक सिद्धान्तं प्रतिपादयति ऋग्वेदः ।

सम्प्रति परस्परच्छलप्रधाने कुटतैकताने पर विनाशप्रधाने स्वार्थसाधनप्रधाने प्रदत्तकृत्रिमसम्माने विहितशान्तिसुखावमाने काले वर्त्ततेऽस्य विश्वशान्तिविचारस्य परमावश्यक्ता । 'अर्थातो ब्रह्मजिज्ञासा'[३] (पूर्वमीमांसा १/१)

सर्वे वेदा अपि विश्वस्मिन् विश्वे सर्वत्रैव शान्तेः स्थापना भवेदेतदर्थं

---

१. यजुर्वेद–४०/६
२. ऋग्वेद–६/७५/२८
३. पूर्वमीमांसा–१/१

मङ्गलं कुर्वन्ति निम्नाङ्कितैः मन्त्रैः । यथा –

शन्नो मित्रः शं वरूणः शन्नो भवत्वर्य्यमा ।
शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरूरूक्रमः ॥

शं न इन्द्राग्नी भवताभवाभिः शं न इन्द्रावरुणी रातहृदया ॥ शन्निन्द्रासोमा सुविताय शं यो शं न इन्द्रपुषणा वाजसातौ ॥

द्यौः शान्तिर् अन्तरिक्षं शान्तिः । पृथिवी शान्तिः, आपः शान्तिः आपः शान्तिः ओषधयः शान्तिः । वनस्पतयः शाति विश्वेदेवाः शान्र्बिहम शान्तिः ॥ सर्वं शान्तिः शान्तिरेव शान्ति सामा शान्तिरेधि ॥

न केवलं भौगोलिक – विश्वशान्तिपर्यन्तम् अपितु धावापृथिवी अन्तरिक्षगतेषु लोकेषु पदार्थेषु च सततं शान्तिः स्यादिति प्रयोजनाया अवधारणायाः वा वर्णनं वेदमन्त्रेषु वर्तते ।

एषः शान्तिपाठो बहुप्रसिद्धः संस्कृतजगति । मन्त्रेऽस्मिन् ब्रह्माण्डगतशान्तरवधारणाया उदातचिन्तनस्य पराकाष्ठा च विहिताऽस्ति । यथा –स्वर्गे अन्तरिक्षे पृथिव्यां जलेषु ओषधीषु सर्वत्र शान्तिर्भवतु, तेन च एते शान्ताः सन्तः सप्तभुवनपावलाः भवन्तु । वनस्पतयः विश्वदेवसंज्ञकाः विबुधाः सर्वव्यापकाः परमात्मा एवञ्च यत्किञ्चित् जगत्यां निखिलं तत्र शान्तिर्भवतु एवं सर्व प्रकारेण मां शान्तियुक्तविचाराणां श्रवणं भवेत् । एततुं संस्कृतवाङ्मयस्य औदार्यं यत् विश्वचिन्तनदिशायां सुतरां समर्द्धयति दिशति च ॥

## ६.२ द्युतक्रीदानिषेधद्वारा मानवकल्याणस्य सामाजिकविचाराः ।

मानवः मर्यादावाहकः संस्कारसम्पन्नः धर्मवृती च भवेत् एतदर्थं ऋग्वेदे

अथर्ववेदे च कथितमस्ति यत् सत्कार्यप्रवृतौ मानवानां कृते अस्तेयकर्मनिषेधः ब्रह्महत्यानिषेधः सुरापाननिषेधः, दुष्यरितनिरोधः पापकाले असत्यभाषणेन पापाचरणस्य गुप्तता इत्यादीनि मर्यादाया उल्लघनं कथ्यते ।

उपर्युक्तासु मर्यादास्वेकस्याप्युल्लघनं मानवेभ्यः पापकर्म कर्तुं प्रेरयन्ति । अत एव मानवैः मर्यादायाः पालनमवश्यं करणीयम्, अन्यथा मानवः पापी भवति । यथा –

सप्त मर्यादाः कवयस्ततक्षुस् [१]

तासामेकाभिदभ्यंहुरो गात् ।

आयोर्ह स्कम्भ उपमस्य नीके

यथां विसर्गे धरूणेषु तस्थौ ॥ (ऋग्वेद–१०,५,६)

वेदेषु द्युतक्रीडाशब्दः मानवविकासस्य प्रतीका रमे कोऽवरोधकों निरोधकः शिक्षात्मकश्चास्ति । दण्डापराधमिवं द्युतक्रीडाऽपराधसम्बद्धः वर्तते । द्यूतक्रीडायाः मानव दुर्व्यवहारको वा नीति विरूद्वे भवति । धूतक्रीडया मानवः स्वस्य परिवारस्य च विनाशको भवति । महाभारते वर्णनं विद्यते यत् धर्मराजयुधिष्ठिरेण द्यूतक्रीडनेन राज्यस्य सम्पत्तेः नैतिककतायाः तथा च पत्न्याऽयमानस्य पीडा प्राप्तग द्वादशवर्षानन्तरं वनवासः एकवर्षानन्तरमज्ञातवासश्च प्राप्तः अत एव कथितमस्ति यत् द्यूतक्रीडा विनाशिकाऽस्ति । वेदेषु वर्णनं विद्यते यत् काचित् स्त्री पुमान वा नीतिविरुद्धो भवेच्चेत् स सर्वथैव दण्डनीयः । यथा –

यदि स्त्री यदि वा पुमान् कृत्यां चकार पाप्मने ।[२]

**तां तस्मै नयामस्य श्वमिवाश्वाभिधान्या ॥ (ऋग्वेद–५/१४/६)**

---

१. ऋग्वेद–१०/५/६

२. ऋग्वेद–५/१४/६

वेदेषु महत्वपूर्णस्थलेषु मानवानां बुद्धिविचारादिपरिवर्तनार्थं ढक्कावादनादिना चापि द्योतक्रीडानिषेधः विपुलतया लभ्यते । येन विज्ञायते यद् जनैः ईदृश न व्यवहर्तव्यम् इति । ऋग्वेदस्य अक्षसूक्त (१०-३४) द्यूतक्रीडास्तस्य आत्मप्रलापः वर्तते । तत्र द्यूतक्रीडया सर्वस्वविनाशो कथं भवति तस्य विश्लेषणं वर्तते । अस्मिन्सूक्ते द्यूतविषयस्य मार्मिकरूपेण निन्दा कृता अस्ति । तस्मिन् द्युतकारः स्वप्रलोभानानां वर्णनं कृत्वा वदति यत् कथं द्यूतपाशं श्रृत्वा हृदयं कथं तं प्रति कर्षति । द्यूतजनं कोऽपि मित्रमपि सहाय्यं न करोति । पत्नी अपि तथैव च । अत्र उत्तमशब्दशैल्यां दयनीयस्थितिवर्णनं कृत्वा कथितमस्ति यत् अन्यजनाः मम भार्यां स्पृन्ति । माता-पिता भ्रात्रादयः वदन्ति वयं एतं न जानीमः । यथा च -

पिता माता भ्रातर एतमा हु न[१]
जानी मो नयता बद्धमेतम् ।
सुक्तान्ते उपदेशं दत्वा कथितमस्ति यत्
अक्षैमां दीव्यः कृषिनित् कृषस्व [२]
विते रमस्य बहु मान्यमानः ।
तत्र गायः कितव तत्र जाया
तन्मे विचष्टे सवितायमर्यः ॥

अर्थात् पाशेन न क्रीडतु । कृषिं कुरु तव धनम् अधिकं मत्वा सन्तोषं कुरु । इत्थं सूक्तस्य भावना अर्वाचीनभावनया सह पूर्णरूपेण सम्बद्धमस्ति तथा कृषिकर्मस्य श्रेष्ठतां स्थापयित्वा कथितमस्ति अतः आकर्षितमस्ति ।

---

१. ऋग्वे.५/१४/६

२. ऋग्वे.५/४५/५

प्रावेथा मा बृहतो मादयन्ति प्रवातेजा हरिषे ववृताना: ।[1]
सोमस्य भौजवतस्य भक्षो विभीदको जागृर्विमहमच्छान् ॥

न मा मिमेथ न जहीक एषा शिवा सखीभ्य उत मह्यमास्त ।[2]
अक्षस्याहमेकपरस्य हेतो रनुवृतामप जायामरोधम् ॥

स्त्रियं दृष्ट्वाय कितव ततो पान्येषां जायां सुकृतं च योनिम् ।[3]
पूर्वाहे अश्वान् युयुजे हि बभून्तस्ते अग्नेरन्ते वृषल: पपाद ॥

मित्रं कुणुध्वं खलु मृकता नो मा नो धोरेण चरताभि: धृष्णु: ।
नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु ॥

अर्थात् वृक्षस्य प्रबलवायुना द्यूतपबटलोपरि चलायमानकर्णपुष्पै: मे मन: अतीवानन्दपूर्ण: सञ्जात: । मौजवतपर्वताद् प्राप्त: सोम रव विभीदक: अयं मया सदैव जाग्रत: प्रतीयते ।

द्यूतक्रीडाया: कीडनकानि क्रियाशीलानि अस्थिराणि च सन्ति । ते क्रीडक तादृशमेवऽहकृष्टं कुर्वन्ति यथा सोमरस: ।

इमानि कीडनकानि सदैव मम साहाय्यं कुर्वन्ति कदापि मे तिरस्कारं न कुर्वन्ति । सर्वथैव मम द्यूतकार मित्राणामपि साहाय्यं कुर्वन्ति ।

स पराजितद्यूतकार: पश्चातापं करोति, तथापि स: द्यूतक्रीडायां रत: दृश्यते, कारणं यत् विजयाऽशक्त्या । यदि स: स्वपल्या: त्यागं नाकरोत् तद् तस्येतादृशस्थितिर्नाभवत् ।

---

१. ऋ.१०, ३४, १
२. ऋ.१०, ३४, २
३. ऋ.१०, ३४, ११

तं श्वश्रा तिरष्करोति यद्यपि भार्या साहाप्यं करोति कारणं यत् भारतीयनारी स्वीकयपत्युः रक्षणमेव पत्न्याः धर्मः इति मत्वा पतिरक्षणं करोति ।

इत्थं द्यूतरतः विविधानुभवमवाप्य स्वकर्मणा धनोपाजनमेव श्रेष्ठं मनुते । तेन सा शिक्षा श्रेष्ठशक्तीनां निरीक्षणेन प्राप्तास्ति । अत्र पश्य सूर्यस्य श्रेमाणं यो न तन्द्रयते चरन् । वाक्यद्वारा सूर्यस्य गतिशीलीतायाः सङ्केतः प्राप्यते यस्यार्थो भवति मानवैः सदैव कर्मद्वारा स्वजीवनं गतियुक्तं कर्तव्यम् ।

**६.३ अतिथिसत्कारद्वारा सामाजिकविचाराः ।**

गृहस्थाश्रमे प्रविविक्षुमेव स्नातकम् आचार्यः आदिशति व्रतस्नानसमये अतिथिदेवो भव । कठोपनिषदि यमराजामात्यैरप्यभिहितम् –

आशा प्रतीक्षे सङ्गतं सुनृतां च इष्टापूर्ते पुत्रपर्शूंश्च सर्वान् ।
एतद् वृङ्क्ते पुरूषस्याल्पमेधयोः यस्यानश्यन् वसति ब्राह्मणो गृहे ॥

अत एव अनिश्चितरूपेण समागतानां जनानां सन्तर्पणं भारतीयसंस्कृतावतिमहत्वमास्ते । ऋग्वेदस्तु आत्मकारणात् पचन्तो जनाः पापिन ए भवन्ति । भगवान श्रीकृष्णोऽप्याह – भुञ्जन्ते ते त्वधं पापा ये पञ्चन्त्यात्मकारणात् । अत एव स्वकीयादन्नात् परस्मैतस्य काश्चनांशस्य दानम् आवश्यकं भवति । तेन अतिथीनां पूजनमत्यावश्यकममास्ते । अतिथिसत्कारों हि निर्विशेषेण सर्वस्य गुरूः । अतिथि हि यदृच्छया गृहं प्राप्नो जनः अतिथि सेवाऽपि पञ्चमहायज्ञेष्वन्यतमम् । यः कोऽपि गृहं प्राप्त आदरणीयः सेवनीयश्च भोजनशययादिनेति अतिथियज्ञस्य रहस्यम् । नहिकश्चिदतिथिर्भग्नाशो गच्छेदिति शास्त्राज्ञा । भावनारिय ऋग्वेदस्य निम्नाङ्कितेषु मन्त्रेषु दरीदृश्यते । यथा –

अतिथिं मानुषाणाम् ।

अग्निः मानवानामतिथि रस्ति ॥

वयं सुदाव्नेः आतिथ्यं कुर्मः ।

आ नूनतिथीनतः पत्नीर्दशस्यत ॥

त्वं नूनतिथीन स्त्रिभ्यश्च धनं प्रददाल ।

आ वहा दैव्यं जनम् यक्षि  च प्रियम् ॥

हे अग्नि त्वं दिव्यजनान् प्रियवस्तूनि प्रददातु ।

जुष्टो श्मूना अतिथिर्दुरोणे ॥

संयमयुक्तातिथीनां स्वागतं कुरूत ।

य ईड्यास्ते ते पिबन्तु जिहवया मधोः ॥

स्तुतियुक्तदेवगणाः जिह्यवया मधुरं रसं पिबन्तु ।

रयिमिव पृष्ठं प्रभवन्तमायते ॥

गृहगितातिथेः धनेन स्वागतं विधेहि ।

स्योनशीरतिथिर्न प्रीणानः ॥

अतिथिं सुखासने प्रीणानः ।

तस्य त्राता यस्त आतिथ्यमानुषशु जुजोषत् ।

हे अग्न यो सर्वदाऽतिथिसत्कारं करोति तस्य त्वं

रक्षकोऽस्ति ।

## ६.४ मुल्यवादिसमाजव्यवस्था ।

विश्वे मूल्यवादि साम्यवादि–राष्ट्रीयसमाजवादिश्च एतादृशानि बहूनि

आन्दोलनानि प्रचलन्ति । व्यक्तिस्वातन्त्र्यवादिनः वदन्ति यद् जनैः समाजस्य राष्ट्रस्य च निर्माणं भवति । जनोन्नत्या समाजस्य राष्ट्रस्य समुन्नतिः भवति ।

अत एव निजोत्कर्षाय प्रत्येकजनैः पूर्णस्वतन्त्रता सम्पादनीया । स्वतन्त्रतां विना मानवानां चरित्रोत्कर्ष स्तु न विकसति ।

विश्वेऽकस्मिन् स्थाने साम्यवादि समाजव्यवस्था द्वितीयस्थाने मूल्यवादि समाजव्यवस्था च वर्तेते । तस्यां व्यवस्थायां घनिकाः सेवकैः कार्य कारयन्ति । स्वयं तु निष्ठराः भूत्वा विपुलं धनभागं गृहणन्ति । मूल्यवादिव्यवस्था एव भीषणार्थिकविषमता याः कारणमस्ति । एकस्मिन् भागे गगनचुम्बिराजप्रसादेषु धनिकाः निवसन्ति । द्वितीये भागे आतपे, शैत्ये, वर्षायाञ्च निकेतरहिताः सेवकाः निवसन्ति । रजतसुवर्णपात्रेषु केचन धनिकास्तु राजसिकाहारेण अजीर्णापीड़ामनुभवन्ति । केचन तादृशा अपि सन्ति ये स्वकीयोदरपूर्तिमपि कर्तुं न शक्नुवन्तिं । मूल्याविदिताः वदन्ति यत्ते तु स्वकीयधनं कार्यार्थं दत्तवन्तः अतः तेषामेव धनाधिकारः वर्तते । एकादृशी मूल्यव्यवस्था सेवकानां धनिकानां चात्मनं यातयति । अस्यां व्यवस्थायां कोटिजनाः निर्धनवर्गीयकष्टान् अनुभवन्ति । बहुधा ते तु निर्धनावस्थायां प्रभाद्य धर्म–नैतिकता सत्ययन्थानं परित्यज्य चौरकार्यं, वञ्चनकार्यं मारणं, छद्मकार्यञ्च कुर्वन्ति । इमे धनिकाः धनवर्धनार्थं स्वकीय विक्रयवस्तुमूल्यस्य वर्धनं कुर्वन्ति । वस्तुसञ्चयं कृत्वा अकालिकी अभावव्यवस्थायां समुत्पादयन्ति । आवश्यताधीनाः निर्धनाः ऋणं दत्वापि आवश्यकवस्तूनि स्वीकुर्वन्ति ।

भौतिकवादिसमाजव्यवस्थायां प्रत्येक जनस्य वृत्तिस्तु धनसम्पादनार्थे एव स्थिरा भवति । धनलोभिनः राष्ट्ररूपेण संगठिताः भूत्वा दुर्बलदेशानामुपरि आक्रमणं कृत्वा तान् शोषयन्ति, पङ्गाञ्चकुर्वन्ति । विजयिराष्ट्रेण

विनितराष्ट्राणामुपरि कृतान्यायः, अत्याचारश्च दुःखमयरूपे इतिहासे विद्यमानोऽस्ति । सिकंदर महमुदः नेपोलियनः, च । एतेषां दुराचारिजनानां युगे वाणिज्यवयवहारः धनवर्धनवृत्तिश्च द्वयमेव मूल्यवादस्योदाहरणं रत्तः । राज्याधिपतिः स्वसैन्यं स्वीकृत्य आक्रमणार्थं निर्गच्छति । यथा आङ्गलव्यापारिणः उपनिवेशेन धनसंग्रहकरणं कुर्वन्ति । अयमपि मूल्यवादिविचारधारायाः प्रमाणम् । विश्वस्मिन् पूर्वस्मिन् काले जातौ द्वावपि विश्वयुद्धौ धनेच्छया एव कारणे रतः ।

### ६.५ साम्यवादिसमाजव्यवस्था :

मूल्यावादिव्यवस्थायां भीषणवैषम्यमस्ति अमानवीयाऽत्याचारः । अपरं जर्मनमाहचिन्तकः कार्लमाकर्सः प्रतिशोधं कृतवान् प्रतिपक्षे । कार्लमाक्र्स महोदयेन निर्दिष्टसाम्यवादस्य हेतुरस्ति यत् मनुष्यजातिषु सो व्यवस्था करणीया या कुटुम्बप्रथायां भवति। प्रतिजनाः स्वकीयशक्त्यनुसारं कार्यं कुर्यात् । सर्वेक्षां भवेत् च । व्यवस्थेयं कुटुम्बस्य यः सम्प्रदायः समस्तमानवजातिषु व्यवस्थामिमां कर्तुमिच्छति स एव साम्यवादः ।

साम्यवादस्तु विश्वे कुदुम्बव्यवस्थां कर्तुं वाञ्छति । कुटुम्बे गृहस्थः दिपर्यन्तं परिश्रमं कृत्वा धनं प्राप्नोति । तस्य भार्या गृहे कार्येक्षु निरन्तरं वयवरता एव । तस्य वृद्धपितरौ न कुर्वन्ति किमपि । शिशुरपि असमर्थः कार्येकरणे । ज्येष्ठः न सूचनं करोति यद कनिष्ठः न किमपि करोति इति । क्रीडायामेव रतः न कार्ये । कुटुम्बस्यायं शक्त्थनुपाती श्रमः इति कथ्यते । प्रतिजनेन करणीयं कार्यं यावत् करणे शक्तिः ।

From everybody according to this capacity

आवश्यकतानुपाती उपभोगः, शक्त्यनुपाती भ्रमश्च ।

Enjoyment cegarding to meads of work according to capacity

द्वौ अपि स्वामिनौ एव । यस्य कुटुम्बस्याधारशीला एव स्थिरा वर्तते । साम्यवादः वदति यत् विश्वे अयं विचारः तु सर्वैः जनैः सम्पादनीय एव । सर्वजनैः तावत्करणीयमेव यावतसामर्थ्यं वर्तते समस्तोपभोगवस्तुनि सम्पादमीयान्येव यावत्सुखपूर्वकं जीवनार्थमावश्यकम् ।

कुटुम्बे न कोऽपि शास्ति अन्यस्योपरि । अतः कुटुम्बस्य विभागं न भवति । शासकवर्गश्च शासितवर्गश्च । यथा राजा तथा प्रजा । एकरत्तु प्रबन्धकः भवति यः कुटुम्बसम्पत्तिं व्यवस्थापयति । सम्पत्तिस्तु कुटुम्बव्यवस्थाया एव । न तु व्यक्तिगता । तथैव समाजेऽपि न कोऽपि सम्राद येन कोऽपि सम्पत्तिं न गृहणीयात् । सम्पत्तिः राष्ट्रस्य एव, जन एव चिनोति प्रबन्धकम् । तस्मादेव आवश्यकतानुसारं भोजनवस्त्रादिकं मिलति । अपरं तदपि अस्ति यत्त् कार्यं तु सर्वेऽपि कुर्वन्ति एव शक्त्या रुच्चा च किन्तु कार्यपरिश्रमः समग्रकुटुम्बस्य धनमित्ति व्यवहीयते केवलं कार्यं कर्तुः । यदि कल्पनां कुर्मः एकस्मिन् कुटुम्बे चतस्रः भ्रातरः कृषिं कार्ये निरता सन्ति तेष्वेकः कृत्वा द्विशतं (मण इति) परिमाणधान्यमुत्पादयति, द्वितीयः पञ्चशतकप्यकाणि मासिकवेतनं समुत्पादयति, तृतीयः वैद्यभ्राता द्विसहसं मासिकवेतनं सम्पादयति, चतुर्थः कमैकरः केवलमर्शीति रूप्यकाणि मासिकवेतनं सम्पादयति । चतुर्ष्णामिपि रूचिभिन्ना, शक्तिर्भिन्ना, वेतनञ्च भिन्नं किन्तु आहत्य समग्रवेतनं कुटुम्बस्य एव । साम्यवादिनः कथयन्ति व्यवस्थेय समग्रजगतः भवितव्या । वेतनं समग्रदेशस्य न कस्यचिदेकस्य । कार्य सर्वे कुर्वन्ति खादन्ति अपि सर्वे । सम्पत्तिस्वामी न कोऽपि एकांका ।

साम्यवादिनां कथमस्ति मूल्यमेव समग्रसमस्यायाः मूलमस्ति, यदि मानवसमूहं पापमुक्तं कर्तुमिच्छामः चेत् एकमात्र एवोपायः तदेवास्ति यद् सम्पत्तिशून्यं सम्प्रदायशून्यं वर्गशून्यं च साम्यवादि समूहं स्थापयितुं समारम्भो भवेत् ।

साम्यवादस्य प्रस्तुतधारणा प्रत्यक्षत: अतीवोदात्ता सुन्दरा च प्रतीयते किन्तु साम्यवादस्य प्रतिबन्ध: केवलं भौतिकमेव । तत्तु केवलं नियमाधीनमेव । साम्यवादस्य ध्यानं केवलं भौतिकसम्पते: उपरि वर्तते । न मनुष्यात्मनि । साम्यवादस्य व्यक्तिगतस्वामित्वं स्वीकार्यं न मनोवैज्ञानिकदृष्ट्या अव्यावहारिकम् । साम्यवादिराष्ट्रेषु कार्यं कार्यमेव । समयाधिको गच्छति तथापि निर्माणं समुत्कृष्टं भवति । सम्पत्तिव्यक्तिगत स्वामित्वमधिकारश्च सर्वथा न विधायक: । साम्यवादस्यादर्शवाद: साम्यवादस्य सर्वतोगतपोषकरूपेण निजशुद्धरूपेण स्थिरं नाभवत् । प्रथमं कर्मचारिणां वेतनं न, कार्येण केवलं परिचर्या एव, एतेन जन: आपणे स्वकीयखानपानादि–आवश्यकतां पूरयितुं समर्थ: भवति स्म । अत: रुसदेशे पुन: वेतनाधीनव्यवस्थाया: प्रारम्भ: अभवत् वेतनाधारोऽपि कार्यमहत्वं कर्मचारिकुशलताञ्च समीक्ष्य एव सर्वं भवति स्म । रूसे वेनानुपात: प्राय:१:८० प्रतिशतं वर्तते । एतावदपि न कर्मधारिणां अधिककार्यकरणमुद्धेश्येन अद्य कर्मचारिवर्गेऽपि कार्यं कारयति स्म । अत: तत्रापि जना: वित्तकोषे स्वकीयधनं संग्रहयति स्म । स्वसंग्रहीतधनस्य उत्तराधिकारिभ्य: प्रदेयसयधिाया: व्यवस्था अभवत् ।

साम्यवादस्तु केवलं प्रकृतिवादिरस्ति । यदि जड़प्रकृतिरुपान्तरमेव जीवनं तर्हि मनुष्य: पशु: च समाना एव । यथा आसन्द: उत्पीठिकात्रभेदहीनौ वर्तते ।

यदि सुखं दु:खम् इच्छा द्वेष: प्रयत्नं ज्ञानञ्च  लक्षणहीनं सत्राहीनं च सन्ति । दु:खनिवारणे परिणामं तदेव यत् अचारशास्त्रस्य मूलं निर्मूलं भवेत् किंश्चित् दया ? यदा आसन्दस्य चत्वार: पादा: प्रज्वाल्यकापि हानिर्न भवति प्राणी हननमपि न दुषितं कर्म  इति । यथेच्छा माररणं यथेच्छा जीवनञ्च भौतिकवादि दृष्टिकोणमाप्य १९१७ वर्षस्य क्रान्त्यनन्तरं लक्षाधिककर्मकरान् मारितवन्त: साम्यवादिविचारका: । अनुमीयन्ते स्म यद् एतादृशास्भां मृतकानां

संख्या सप्तलक्षाऽभवत् । कारणेनेन नं कृषिकार्यस्य संवर्धनाभावेनोत्पदनस्य न्यूनता, तथा च अल्पवृष्टेः प्रभावात् पञ्चाशत् लक्षपरिमिताः जनाः मरणासन्नाः अभवन् । एतस्मादतिरित्य पञ्चाशद् लक्षेभ्योऽधिकाः जनाः विलीनाः सञ्चाताः साम्यादि विचारधारायुक्ताः । साम्यवादिदेशेषु जनानां विचारचिन्तनयोः त्यागः न्यायः दयादि नैतिक – चारित्रिक गुणाश्च विलीनाः जाताः ॥

## ६.६ ज्ञानविज्ञानादिभिः आधुनिकदिशानिर्देशः ।

### ६.६.१ कृषिविज्ञानम् ।

मानवानां सभ्यसमाजे परस्परसम्बन्धस्य मूलं कारणं सम्भवतः कृषिरेवास्ति । मानवानां जीवननिर्वाहाय भोजनस्यावश्यकता भवत्येव । मानवाः सजीवप्राणिषु सर्वेभ्यः प्राणिभ्यः बुद्धिमन्तः वर्तन्ते । तैः स्वकीयान्तरिकशक्तीनां प्रयोहपूर्वं भोजनव्यवस्थाविषये चिन्तनं कृतं तत्सत्यम् । तस्य प्रमाणमस्माभिर्वेदेषु प्राप्यते । अत एव वैदिकमहर्षिभिः कृषिविज्ञानविषये प्राकृतिक साधनानमुप्रयोगेन सम्पूर्णविश्वं तथा च ब्रह्माण्डस्याऽस्तित्वान्तर्सम्बन्धविषये चिन्तनं कृतमस्ति । कृषिप्रधानेऽस्मिन् भारतवर्षे वैदिककालादेव कृषेर्महत्वविषये वर्णनमुपलभ्यते । वैदिकयुगे आर्थिकसाधनं मुख्यतः कृषिः पशुपालनं चासीत् । उभयोः कार्यपूरणार्थं सहयोगार्थं वा तक्षाकल्य गृहनिर्माणवाणिज्यादयो दृश्यन्ते । तेषां स्वतन्त्राः वर्गाः आसन् तद्यथा –

"सुसस्याः कृषीस्कृधी ।"[१]

"सुरूप कृत्स्नुमूतये सुदुधामिव गोदुहे जुहुमसि द्यविद्यवि ।"[२]

---

१. ऋ.४,१०

२. ऋ.१,४,१

कृषिविधेराविष्कारः वस्तुतस्तु सम्पूर्णमानवेतिहासे मानवस्य प्रथमा महत्युपलब्धिरस्तीति मन्यते सर्वैरितिहासज्ञैः । वैदिकऋषिभिः कृतं अथर्ववेदस्यैकस्मिन्सम्पूर्णसूक्ते कृषिक्रमस्य क्रमिकविवेचनं प्राप्यते, अस्फुटरूपेण कृषितत्वानामुल्लेखाद्वयतिसिक्तम् अथर्ववेदे पृथक्कृतं कृषिसुक्तं वर्तते ।

शुनः वाहाः शुनं नरः शुनं कृषतु लाङ्गलाम् ।[१]

सीरा युग्जन्ति कवयो युगा वितन्वने पृथक् ।[२]

अक्षैमह दीव्यः कृषिमित्कृषस्व वित्ते रमस्य बहुमन्यमानः

अन्नपतेऽन्नस्य न देहि ।[३]

ऋग्वेद एकं सम्पूर्णसूक्तं ४, ५४ कृषि वर्णनसम्बन्धि दृश्यते । तत्र क्षेत्राधिपतेः स्तुति विद्यते । अथर्वसंहिता यां

नो राजा निकृषिं तनोतु ।

इति पदे-पदे कृषेर्महत्वं दरीदृश्यते । कृषिमाध्यमेनान्मोत्पादनविषये यजुर्वेदे वर्णनं विद्यते

सुसस्याः कृषीस्ककृधि ।

श्रेष्ठान्नं खाद्यत्वेन समाजपोषणं करोति अतः त्वं श्रेष्ठान्नमुत्पादयतु ।

अन्नं वै प्राणिनां प्राणाः ।

अन्नं साम्राज्यानामधिपतिः ।

---

१. ऋ.४, ५०, ४

२. ऋ.१०,१०१,४

३. तैत्तिरीयोपनिषद-अनुवाक्-९

तैत्तिरीयोपनिषदः नवतमेऽनुवाके अन्नोत्पादनविषये तथा च तेषां अस्मिन् विषये ऋषिः कथयति –

अन्नं बहुकुर्वीत । तदवृतम् । पृथिवी वा अन्नं । आकाशो अन्नादः । अन्नाद्वे प्रजा प्रजायन्ते । याः काश्चपृथिवीश्रिताः । अथो अन्नेनैव जीवन्ति । अन्नं हि भूतानां ज्येष्ठम् । तस्मात् सर्वौषधमुच्यते । सर्वं वै ते अन्नमाप्नुवन्ति मे अन्नं ब्रह्मोपासते । अन्नाद् भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेअत्ति च भूतानि तस्मादन्नं तदुच्यत इति ।

कृषकः क्षेत्राधिपतित्वेन समाजे सम्मानं प्राप्नोति । ऋग्वेदस्य १०, १०१, ३–६ सुक्ते किन्तियुक्तविद्वज्जनैः बीजोत्पादनस्य प्रेरणा प्रदत्ताऽस्ति । अर्थात् विद्वज्जनाः अपि कृषिकर्म गौरवं मन्यन्ते स्म । कृषिकार्ये विविधयन्त्राषामुल्लेखः प्राप्यते येन कृषकः वचनादिकार्याणि करोति स्म । वर्तमानकालिकाऽधुनिकयन्त्रसदृशानि यन्त्राणि नासन्, किन्तु तस्मिन्युगेऽपि विविधयन्त्राणि सन्तीति दिक् । भूमिविषये विविधप्रयोगाः यथाक्षेत्रं, उर्वरा फलप्रदेत्यादि । – अत एव वेदेषु पृथिव्याः गौरवगानं मातृत्वेन कृतमस्ति । यथा –

नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्या ।[१]
कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा ॥

कृष्यैव मानवाः पशवश्च जीवन्ति । कृष्या एव मानवानां पशूनाञ्च जीवनं सौख्यदं भवति ।

यस्यामन्नं व्रीहि यवौ यस्या इमाः पञ्चकृष्टयः ।[२]
भूम्यै पर्जन्यपत्न्यै नमो अस्तु वर्षमेदसे ॥

१. यजुर्वेद – ९, २२
२. अथर्व.–१२, १, ४२

यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः ।[१]
या बिभर्ति बहुधा प्राणदेजद् सा नो भूमिर्गोष्विप्यन्नं दधातु ॥

यजुर्वेदस्य वाजसनेयिसंहितायां वाजप्रसर्वायसुक्तस्य प्रथममन्त्रे कृषिरेव अन्नोत्पादनस्य कारणरूपा प्रदर्शिताऽस्ति ।

वाजस्य नु प्रसवे मातरं महीमदितिं नम वयसा करामहे ।[२]
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत्

अन्नोत्पादनस्य मात्रासु वृद्धिः अन्नस्य मह वं प्रतिपद्यते । मानवमात्रस्य हितसाधनार्थं भोजनस्य महत्यावश्यकता कृषेमूलाधार एव वर्तते । मानवेन विभिन्नेषु व्यञ्चनेषु विभिन्नप्रकारेषु फलेषु च अन्नानां प्राप्तेरूपायः क्रियते एव । मानवस्यावश्यकता कृषिकार्यवृद्धर्थं निगद्यते । येन प्रकारेण भारतीयवैज्ञानिकानां प्रकारेण बृहत्संहिताकाराचार्यवराहमिहिरेण अन्नमेव अस्य जगतः प्राणः मन्यते । तद्यथा – अन्नं जगतः प्राणाः प्रावृटकालस्य चान्नमायत्तम् । प्रसङ्गेऽस्मिन् अन्नस्य मह...वं महर्षिपराशरः कृषिपाराशरग्रन्थे प्रस्तूयते यत् –

अन्नं प्राणाः बलं चान्नमन्नं सवार्थसाधनम् ।[३]
देवासुरमनुष्याश्च सर्वे चान्नोपजीविनः

अर्थात् अन्नमेव प्राण अन्नमेव बलं एवञ्च अन्नमेव समस्त प्रयोजनानां साधनमात्रमेव वर्तते । अतः देव–असुर–मनुष्यश्च सर्वे अन्नस्य उपजीविकाः दृश्यन्ते । ऋग्वेदस्य दशममण्डलस्य एकशतोत्तरसूक्ते –

---

१. अथर्व. –१२.१,४
२. अथर्व. – १२,१,१९
३. कृषिपाराशरे श्लो.०४

युनक्त सीराः त्रिभुजा तनुध्वं कृते योनौ वपते हबीजम् ।[1]
रिरॉच श्रृष्टो सभरा असन्नो नैदीय ईत्सृण्यो पक्वमेयात ॥

मन्त्रे कृषिकार्ये वृषभानामुपयोगं कुरु, उत्पादित वस्तूनि गृहाण, कृषिक्षेत्रे जलेन सिञ्चनं कुरु, जलसिञ्चनकार्ये नलिकाभिः कार्यं कुरु, वपनयोग्यभूमौ मधुना धृतेन च सिञ्चनं कुरु, अत्र मधुसर्पिशब्दौ उर्वरकस्य निर्देशं कुर्वतः दृश्यते ।

महर्षिपराशरः स्वकृषिपराशरग्रन्थस्य कृषिखण्डनामक प्रकरणे निगद्यते यत् कृषिकर्म धन्यं पवित्रञ्च अर्थात् परिशुद्धं वर्तते । न केवलं कृषिः एव जीव–जन्तूनां जीवन मात्रं भवत्येव । अतः कृषिकर्म यः करोति अर्थात् कृषकः हिंसादिदोषसंयुक्तोऽपि मुच्यते । यथा –

कृषिर्धन्या कृषिर्मेध्या जन्तूनां जीवनं कृषिः ।[2]
हिंसादिदोषयुक्तोऽपि मुच्यतेऽतिथिपूजनात् ॥

बृहत्संहिताकारेणाचार्यवराहमिहिरेण कृषिकर्मणः वैज्ञानिकतया सिद्धान्तः प्रतिपादितः अर्थात् कृषिकर्मण मह... वस्य वृद्धयर्थं अनेकानि शोधकार्याणि प्रस्तूयन्ते यत् कृषिकर्मणा केन प्रकारेण भूमेः सर्वश्रेष्ठता मन्यते । सा कृषिकार्ययोग्यभूमिः केन प्रकारेण उपयुज्यते । यथा –

मृद्वी भूः सर्ववृक्षाणां हिता तस्यां तिलान् वपेत् ।[3]
पुष्पितांस्तांश्च मृद्वीयात् कर्मैतत्प्रथमं भुवः ॥

---

१. कृषिपाराशरे श्लोक–२
२. बृहत्संहिता श्लो.२ पृष्ठ.३७५
३. यजुर्वेद.२२, २२

भारतीयकृषिविज्ञानं पर्जन्याधारितमस्ति । ऋग्वेदस्य मण्डूकसूक्ते उपर्युक्त सङ्केतो प्राप्यते ।

विद्मा शरस्य पितरं पर्जन्यं शतवृष्ण्यम् ।

अतो वैदिकऋषयः तं पृथ्वीपतिः वा पिता मन्यन्ते ।

भूम्यै पर्जन्यपत्न्यै नमोअस्तु वर्षमेदसे ।

तेन कारणेन वेदेषु सर्वत्रैव वर्षोपलब्धेः कामना कृता वर्तते ।

निकामे निकामे नः पर्जन्यो वर्षतु ।[१]

यज्ञद्वारा वृिष्टिविधानमपि दृश्यते ।

अमाय वर्तस्व पृथिवि यज्ञेन पयसा सह[२]

यद्यपि, अद्यावधि आधुनिककाले कृषिविज्ञानमुच्चावस्थायां प्राप्तं दृश्यते । अर्थात् भौतिकयुगेऽस्मिन् वैज्ञानिकरीतिः प्रचलितास्ति । किन्तु वैदिककाले कृषिकार्यार्थं खनित्रं कुददालं वा प्रयुज्यते स्म । कृषि कुर्वन्तोऽपि ते युक्त्युपायेभ्योऽनभिज्ञा, आसन्, किन्तु वैदिककाले कृषियन्त्राणां कृष्युपायानां च प्रचलनमारब्धम् । अपि त्वुत्तभवृत्तितया वैदिकऋषयः कृषिः समृद्धिदं कर्म इति कत्वा दुर्व्यसनापेक्षया कृषिं कृत्वा वित्तार्जनस्योपदेशं कृतवन्तः । यथा –

अक्षैर्मादीव्यः कृषिमित् कृषस्व

वित्ते रमश्च बहुमानः ।

---

१. यजुर्वेद–२२, २२
२. यजुर्वेद–१८, ९
३. यजुर्वेद–११, १०३

तदुपरि सेचनप्रक्रिया गोधूम्यावातमाषमुदगतिलादिस्यानि भवन्ति स्म । आधुनिकपद्धतिरिव वैदिकयुगेऽपि भारतदेशे ग्रामिणकृषिक्षेत्रेषुनद्यामुपरि जलबन्धपद्धत्या सिञ्चनविकासः सञ्जातः । कारणं यत् नदीषु आगन्तुकजलप्रपातप्रवाहं जलवन्धपद्धत्या एव अङ्कशीकृत्य विनाशमवरुणदिदः जनाः । वैदिकऋषयः पृथिव्यां कृष्यर्थं सस्यवतीं भूमिमन्विषन्तो यदा अकृष्टपच्यानि व्रीहयवादन्नि धान्यानि प्राप्तवन्तः, तर्हि तैरेव धान्यैः सम्पादितयज्ञाः ते कृषेर्महत्वं ज्ञातवन्तः, अन्नप्राप्तेरुपायरूपेण कृषेरुपादेयतां विज्ञायैव यदा वर्णाश्रमव्यवस्था प्रारब्धा, तदा सर्वेषामपि सामान्यधर्मतया वैश्यानां च विशेषधर्मतया कृषेरुपादेयता ख्यापिता । कृषिकार्यं प्रतिवर्षप्रचलितव्यवसायोऽस्ति, येनोत्तरोत्तरोत्तमावृद्धिर्भवति । हलगोभ्यां सह हलस्थितसीतः गौरवयुक्तवस्तुरस्ति, तस्य गोभ्यः मधुरेण पयसा सह तुलनाकृता वर्तते । ऋग्वेदानुसारं कृषकः श्रमिकमिव श्रमं करोति तथापि कृष्युत्पादने परमेश्वरं प्रार्थयति । कृषकः सदैव स्वस्य भौतिकसमृद्धिमाध्यात्मिकस्वरूपं प्रदातुं प्रयत्नरतो दृश्यते ।

अथर्ववेदस्य भूमिसूक्ते कृषियोग्यभूमेः सुन्दरमद्भुतञ्च वर्णनं विद्यते । प्रस्तुतसुक्तेन ज्ञायते यदा कृषकः स्वभूमिमुर्वरायुक्तकरणे प्रयत्नं करोति स्म । अथर्ववेदस्य तृतीयमण्डले करीषिणी, फलावती, सुधाभिरामशब्दाः विधन्ते, तत्र करीषशब्दस्यार्थों भवति गोमयम् । यथा –

संजग्माना अबिभ्युषीरश्मिन् गोष्ठे करीषिणी ।[१]
बिभ्रती सौम्यं मध्वनमीवा उपेतन ॥

१. अथर्ववेद–३,१४,३

ऋग्वेदे शकृतशब्दोऽपि गोमयकृते प्रयुक्तो दृश्यते । गोमयं शारीरिकाऽऽयुर्वेददृष्ट्या च अतीवोपयोगी वर्तते । आधुनिकेऽस्मिन्युगे तेन गोमयवायुः बायोगेसनिर्माणं भवति, गोमयेन निसृतजीवाणुभ्यः रासायणिक प्रक्रियया बायोगेसस्य निर्माणं भवति । मूलतः प्राणीनां मलमूत्रादिभिरुत्यद्यते, गोमयवायुः तथा च उर्वरकनिर्माणमलमूत्रादिभिरुत्पद्यते, गोमयवायुः तथा च उर्वरक निर्माणसाधनयन्त्रमधुना गोबरगैसप्लाण्टनाम्ना जानन्तिसर्वे । गोमयं वैदिका अपि स्तुवन्ति ।

अथर्ववेदस्याध्ययनेन पीरज्ञायते यत् तस्मिन्काले पशूनां गोमयेन कृषिकार्यं भवति स्म । कृषिकार्ये यन्त्राणामुपयोगः भवति तेन कृषिकार्यं पूर्णं भवति सैविध्यधान्योत्पादने च अभिवृद्धिः भवति । आर्याणां कृषिस्नेहः विषयकं बहूनि उदाहरणानि उपलभ्यते । "कृषिमित् कृषस्व" अर्थात् समाजं कृषिं प्रति प्रेरयति । एकस्मिन् मन्त्रे कृषियोग्यभूमिं उर्वरवाक्षेत्रनाम्ना ज्ञायते । जलपरिपूर्णकुपानामपि उल्लेखः कृतोऽस्ति । पाषाणक्रेणक्पात् जलं बहिः निष्कास्यते । मध्ये हलं - वृषभ-शकटादीनामुल्लेखः अस्ति । कृषिकार्ये हलं मुख्यसाधनमासीत् । एकस्मिन् सूक्तमध्ये अश्विनौ हलेन बीजवपनकार्ये संलग्नौ दर्शितमस्ति । अत्र हल 'सीर' नाम्ना उच्यते स्म । तं कर्षयितुं षड, अष्ट वा चतुर्विंश वृषभैः संलग्न क्रियन्ते स्म । कृषिकार्येण बहवः पाकाः भवन्ति स्म ।

अथर्ववेदे कृषकेभ्यः वैज्ञानिकैराज्ञा प्रदत्ता वर्तते यत् नैकवारमुत्पादनं क्रियते चेत्तदा भूमेरुर्वराशक्तिम्प्रति अवश्यमेव ध्यातव्यम् । पृथ्विसूक्तस्येकमन्त्रे जलयुक्तभूमिः कथमुर्वरायुक्ता भवेत् । वृष्टिजलस्य तथा च कुपादीनां सिञ्चनपद्धतेः वर्णनमपि प्राप्यते । ऋग्वेदे अवतशब्दः कुपस्य सम्बोधनं करोति । खनित्रिमा आपः शब्दप्रयोगः सिञ्चनकार्ये दृश्यते । यथा आधुनिकेऽस्मिन्युगे

कृषिकार्यार्थे नदीषु बहुहेतुकयोजनाया: परिणामत: अनेके कृत्रिमसरोवराणि सञ्जातानि तथैव प्राच्ययुगेऽपि कुप:, तडाग:, प्रवाहिका(नहेर) द्वारा सिञ्चनकार्यं भवति स्म । नदीत: निष्कासितप्रवाहिकाया: प्रयोग: कृषियोग्यभूमे: उर्वरकवृद्धये तथा च कृषिरुत्पादनवृद्धये भवति स्म । तदुपरि कूपा: जलप्राप्त्यर्थं सर्वोत्तमं व्यापकत्वं स्रोतं विद्यते ।

आधुनिककृष्योत्पादनस्य तुलना यदि प्राच्य वा वैदिकयुगाद् कुर्मस्तर्हि पक्षपातं विहाय कर्तुं शक्यते यत् संसारे आधुनिकयुगेऽपि वैदिककृष्युत्पादनादवृद्धिर्न जाता । अर्थादाध्यात्मिकदृष्ट्या विश्वस्य पतनमेव जातमस्ति । इत्थमयमपि तथ्यमुत्पद्यते यत् वैदिकयुगे कृषि: वैज्ञानिकपद्धत्या भवति स्म, किन्तु आधुनिकयुगे यद्यपि वयं वैज्ञानिकयुगे जीवाम:, तथापि प्राच्ययुगसदृशी प्रगतिर्न दृश्यते । तस्य निष्कर्षो अयमेव विद्यते यत् यस्य पार्श्वे एतादृशी वैज्ञानिकपद्धतियुक्ते कृषिक्षेत्रे प्रगतिरासीद् तं युगं कथम् ? असभ्ययुगं कथ्यते । तस्मिन्युगे अन्नोत्पादकेभ्य: प्रति समाज: निश्चयेनाऽडदरभावं धारयति, अधारयच्च ।

### ६.६.२ पशुपालनेनार्थोन्नति: ।

प्राचीनकालादेव विश्वस्य सर्वप्राणिनां विषये सर्वतो भावेन विचारितं मनीषिभि: यत: वेदास्तत्र प्रमाणम् । वर्तमानोद्यौगिकयुगेऽविष्कृतयन्त्रै: अधिकोत्पादकं एवञ्व निम्नकष्टदायकपशूनां स्थानं धरितमस्ति । अत एव आधुनिकेऽस्मिन्युगे वैज्ञानिका: पशुभि: कृते महत्वं न ददन्ति, किन्तु वैज्ञनिका: यन्त्रोत्पादनेन गर्वान्विता: भवन्ति, तद्युक्तं वर्तते, कारणं यत् चेतनायुक्तपशुभि: साकं तेषां स्पर्धा कदापि योग्या नास्ति । विशालदृष्ट्या पश्यामश्चेत' सम्पूर्णं विश्वं परिवार तुल्यमस्ति, यद्यपि वैदिकमहर्षिभि: कामना कृतासीद् यद् विश्वं

भवत्येकनीडम् । तत्र मनुष्याणां स्थानं सदस्येन भूयते । यथा कुटुम्बे वृद्धानामुच्चस्थानस्य कारणं वर्तते ते कुटुम्बस्तिाल्यविकसितजनानां विकासायकार्यं करणीयं न तु तेषां दासत्वेन शोषणं कर्तव्यम् । इत्थमेव मानवसमाजस्य कर्तव्यं भवति यद् निम्नपशूनां वा प्राणिनां रक्षणम् । यथा अजापालकः अजाभ्यः रक्षणकार्ये शूनां पालनं करोति तथैव मानवैः पशुपक्षिणां पालनं तथा च रक्षणं विधातव्यम् । मानवानां जीवने तथा चार्थिकविकासे पशूनां महत्वपूर्ण योगदान मस्ति ।

ऋग्वेदे गवामश्वानाञ्च स्थानं महत्वपूर्णमासीत् । तेषां सुखसमृद्धये योगक्षेमाय च परमेश्वरस्य प्रार्थना मङ्गलकामना च प्राप्यते । केषाञ्चित् जनानां कथमस्ति यदाऽर्याः तथा च सेमेटिकजनाः अश्वान् सर्वाधिक स्नेहं कुर्वन्ति स्म, किन्तु तदयुक्तम् । वेदाः तादृशं न मन्यन्ते । वेदानुसारं सर्वेषां पशूनां रक्षणं स्नेहञ्च मानवानां प्रधानं कर्तव्यमासीत् । इमे पशवः गृहस्थितपशवः आसन् । पालकाः तेषां यत्नपूर्वकं पालनं कुर्वन्तिस्म । तथापि मानवानां कृते गौः सर्वाधिकप्रियप्राणीवर्तते । अत एव वैदिककालादेव मानवाः गवां रक्षणं कुर्वन्तः दृश्यते ।

**गोपालनम् :**

बहुवर्षेभ्यः भारतं धन-धान्यसमृद्धौ, पशवः संरक्षणे च स्वर्णपटकेति नाम्नां विश्वस्मिन्नपि विश्वेविख्यातम् । वैदिककालादेव भारते राजानः आर्थिकसमृद्धावात्मनिर्भराः आसन् । धान्यसमृद्धिरपि अन्यराट्रापेक्षया समृद्धाऽसीत् । धान्यसमृद्धौ पशूनां योगदानं सर्वविदितमस्ति । विशेषतः, कारणं यत् गावंशाधारिता कृषिरेव सर्वोत्तमा कृषिः विद्यते । उपार्जनस्यापि समुचितं समाधानं गावः कुर्वन्ति । गच्छनीति गौः इति विग्रहे गम्ला इत्यस्माद् धातोः

गोशब्दो निष्पद्यते । गतिशब्दः अनेकार्थक तत्र गतिर्गमनं, गतिर्मोक्षः, गतिप्राप्तिः, गतिर्ज्ञानम् इति गत्यर्थकधातोरर्थो भवति । गो इत्यत्र गल्लृधातोर्निष्पन्नत्वाद् गोपदार्थस्य एवं विधं रहस्यं ध्वन्यते यद् गोर्न केवलं भौतिकदृष्ट्या तन्महत्वमपि तु आध्यात्मिकक्षेत्रे तस्य गोशब्दस्य प्रतिष्ठा च व्यक्तीभवति । । आध्यात्मिक दृष्ट्या गोमहत्वं संवर्धयदथर्वसूक्तं प्रतिपादयति यद् – गोभिष्टरेमामतिं दुरेवान्[१]

माता रुद्राषां दुहिता वसूनां
स्वसाऽदित्यानाममृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय
मा गामनागामदितिं विधिष्ट ॥

मन्त्रस्यार्थो भवतीति यद् गौः रुद्राणां माता, वसूनां भगिनी धृतरूपामृतस्य निधिरस्ति । अतो विचारशीलैः पुरूषैः निरपधायाः, अवध्यायाः गोः बधो न कार्यः ।

गावो भगो गाव इन्द्रो इच्छाद्[२]
गावः सोमस्य प्रथमस्य भज्ञः ।
देवांश्च याभिर्यजते ददाति च
ज्योतिभिः स च ते गोपतिः सह

अस्य ऋचोऽर्थो भवति यद् गाव अस्माकं मुख्यं धनं भवतु, अत इन्द्र अस्मभ्यं गाः ददातु, कथं यद् यज्ञानां प्रधानरसेन सोमरसेण सह गवां पयः नैवेद्याय भवतु । येषां पार्श्वं गावः सन्ति, स इन्द्रतुल्यो वर्तते । वयं श्रद्धायुक्तेन

१. ऋग्वेद–८,१०१,१५
२. अथर्व.१०,१४

मनसा गव्यपदार्थैर्भगवन्तं यजामहे । यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम् ।

भद्रं गृहं कृणुथा भद्रवाचो
बृहदो वय उच्यते सभासु ॥[१]

हे गावः भवत्यः कृशशरीरा अपि सर्वानस्मान् हृष्टान् पुष्टान् कुर्वन्ति एव तेजोहीनान् दर्शनेन सर्वा गावः तेजोयुक्तान् कुर्वन्ति । भवत्यः स्वमङ्गलमयशब्देनास्माकं गृहाणि मङ्गलमयानि कुर्वन्ति, सर्वसभायां भवतीमाङ्गवां महायशोगानं भवतु । तदुपरि गवां दुग्धं रक्तपित्तहरं शीतं मधुरं वातपित्तध्नम्, इत्थं नैकरोगाणां शमनं गोदुग्धं करोति । तथैव वेदमन्त्रा अपि गोदधिमहत्वं गायन्ति, यद्

दधिक्रण्कणोऽअकाड्ि्षज्जिचस्यव्वाजिनः ।[२]
सुरभिनो मुखाकरत्प्रणऽआयुंषितारिषत् ॥

गोसर्पिमहत्वं गायन्तः मन्त्राः गां स्तुवन्ति,

यद्,

धृतंधृतपावनः पिबतश्र्वसांव्यसापावानः[३]
पिबतान्तरिक्षास्य हविरसि स्वाहा ।
दिशः प्प्रदिशऽआदिशोविवदिशऽउदिदशोदिग्भ्यः स्वाहा ।

---

१. ऋग्वेद–९,१०,२९
२. यजु.४/२५
३. यजु.४/२९

अयं शुक्लयजुर्वेदीयो मन्त्रोऽपि गोस्तुतिंकुर्वन् कथयति यद् यज्ञस्य मुख्या क्रिया गोषु निर्भरावर्तते, अतो यज्ञस्यादावन्ते च गोदानम्भवति, एतद्गोदानं केवल यज्ञे एव न भवति, अपि तु प्रत्येकस्मिन् धार्मिककृत्ये आवश्यकम् ।

राष्ट्रे राज्ञां कर्त्तव्यविषये कथितमस्ति यद् गवां रक्षणं प्रधानकर्तव्यमस्ति, तैः योग्यभरण–पोषणद्वारा स्वकीये राज्ये निरीक्षणीयम् । ऋग्वेदस्य षष्ठमण्डलस्य अष्टाविंशतितमे सूक्ते गवां रक्षणस्य निर्देशः प्राप्यते ।

गावः अस्माकं गृहे गोष्ठे वसन्तु कल्याणञ्च कुर्वन्तु, स्वसंततिभिरस्माकं गोष्ठे स्थित्वाऽस्मान् भधुरं पयः प्रददन्तु ।

ये गोपालकाः तासां रक्षणं कुर्वन्ति ते कदापि न नश्यन्ति तस्कराऽपि न दभन्ति शत्रूणामस्त्राणि । तेभ्यः न घर्षन्ति, यया गोपालकाः देवयजनं कुर्वन्ति ता भिः साकं चिरकालं यावत सुखमाप्नुवन्ति ।

गवां रणुककाटो अश्वा अपि न अश्नुते, अतः तेभ्यः वधं न कुरूत । गावः निर्भयत्वन विचरणं करिष्यन्ति तादृशं कार्यं कुरूत ।

हे इन्द्र । त्वमस्मान् गाः ददातु, गावः सोमस्य प्रथमस्य भक्षः रमा या गावः स जना स इन्द्रमे इच्छामि वयं श्रद्धया इन्द्रमिच्छामि ।

यूथं गावो भेदयथा कृशं चिदश्रीरं चित्कृणुथासुपृतीकम् ।[१]
भद्रं गृहं कृणुथ भद्रवाचो बृहदो वय उच्चते सभासु ॥

प्रजावतीः सुयवसं रीशन्तीः शुद्धा अपः सुप्रापणे पिबन्तीः ।
मा वः स्तेन ईशतमाधशंस परि वो हेती रुद्रस्य वृज्याः ॥

---

१. ऋग्वेद–६,२८,६

उपेदमुपपर्चनमाशु गोषूप पृच्यताम् ।
उप ऋषभस्यरेतस्युपेन्द्र तव वीर्ये ॥[1]

अथर्ववेदेऽपि गोपालनसम्बन्धिनिर्देशः प्राप्यते । यथा –

सं वो गोष्ठेन सषुदा ।[2]
शिवो वो गोष्ठो भवतु ।[3]

तदुपरि गवां रक्षणविषये इमानिवात्रयान्यपि सङ्केतयन्ति । यथा –

अबिभ्युषी । रायस्पोषेण बहुला भवन्तीः । मया गावो गोपतिना सचध्वम् । अनमीवाः ।

उपर्युक्तानि वाक्यानि निर्देशयन्ति यद् गवां पुष्ट्यर्थे, रक्षणाय, स्वगृहे गोपालनं गवां निरोगित्वे प्रयत्नः कर्तव्यः इत्यादि ।

अथर्ववेदस्य सूक्ते उत्तमवृषभेन सह गवां सम्बन्धः स्थापितव्यः येनोत्तमगवां प्राप्तिर्भविष्यति । गवां सन्तानोत्पत्तिविषये साहस्र, त्वेष, ऋषभः पयस्वान्, उस्त्रियः पुमान् अन्तर्वान्, तन्तुमातान्, स्थविरः पिता वत्सानं पतिरध्न्यानां, प्रतिधुक्, पीयूष अमिक्षा धृतं तद्वस्य रेतः, सोमेन पूर्णं कलशं बिभर्षि, आज्यं बिभिर्षि धृतमस्य रेतः, त्वष्य रूपाणां जनिता पशुनाम् इत्यादयः शब्दाः गवां पालनस्य तेषां सन्ततिः समाजोपकारकः भवेत्, तथा च राष्ट्रे गावः उपयोगितायाः निर्देशंकूर्वन्ति ।

१. ऋग्वेद–६, २८, ८
२. अथर्ववेद–३/१४/४
३. अथर्ववेद–३/१४/५

गावः सोममयं मधुरं दुग्धं धारयन्ति । अनेन स्पष्टं भवति यद् वेदेषु गोपालनस्य महत्वं प्रतिपादितमस्ति । तथा च सोमरसस्य निर्देशेन मधुपानस्य निर्देशो नास्ति अपि तु गवां दुग्धं सोमतुल्यमधुरं भवति ।

प्राचीनभारते नहि कोऽपि जन उपार्जनाभावेन बभुक्षितोऽभवत् । अधुना तु सहस्रशो जनाः परिवाराश्चोपार्जनाभावाद् बुभुक्षया प्राणानपि त्यजन्ति, किन्तु वैदिककालपर्यन्तं पशुसंरक्षणप्रभावाद जनाः सुखानुभूत्या समृद्धा आसन् ।

इत्थं पशुपालनेनार्थोन्नतिः भवितुं शक्यते ।

### ६.६.३ यन्त्रविज्ञानेन विकासः ।

### उद्योगद्वारा विकासः

रथनिर्माणं, धातुनिर्मितसाधननिर्माणं, अस्त्रशस्त्र-निर्माणञ्च वैदिककाले बहुशः भवति स्म, तस्योल्लेखः ऋग्वेदे प्रत्यक्ष वा परोक्षरीत्या प्राप्यते । युद्धकाले रथनिर्माणादि रूपकानि वा उपमाद्वारा सङ्केतः प्राप्यते । ऋग्वेदकाले काष्ठनिर्मितवस्तूनां कर्मकस्स्योल्लेखः प्राप्यते । धातुभिः निर्मितवस्तुकारं तपनादिकार्यं कृत्वा वस्तुनिर्माणं करोति स्म । गृहोपयोगिवस्तूनि, आयसनिर्मितानि आसन्, आयसविषये विद्वज्जनानां मध्ये मतैक्यं नास्तिः केचन ताम्रं, कास्यं, वा लौहं कथ्यन्ते । किन्तु आयसी पूः आदि शब्दाः लौहं प्रतिपादयन्ति । धातुनिर्मितपात्रं विहाय वैदिककाले गृत्पात्राणि, काष्ठपात्राणि तथा च पर्णनिर्मितपात्राणुमपयोगो भवति स्म । चर्मस्योपयोग धनुषि भवति स्म । तदुपरि वैदिककाले गृहोद्योगाः अपि प्रचलन्ति स्म, येन विविधवस्तूनां निर्माणं, सूचिकमादि कार्याणि भवन्ति स्म ।

ऋग्वेदकाले उपर्युक्तोद्योगाः विकसिता आसन्। तस्मिन्किर्मणि जनेभ्यः स्वातन्त्र्यमपि प्रदत्तम्। ते स्वेच्छया विविधकर्माणि कुर्वन्ति स्म। यथा –

कारुरहं त्तो भिषगुपल प्रक्षिणी नना।

अर्थादहं कविरस्मि, मम तातः वैद्यः अस्ति। मम भ्रातुः प्रशिक्षणी वर्तते। वयं विविधविचारयुताः जनाः स्वेच्छया द्रव्यप्राप्तये प्रयत्नरताः स्मः।

अत एव कथितमस्ति यत् वैदिककालस्य वर्णाश्रमप्रथा जन्माधारिता नासीदयितु कर्माधारितासीत्। यजुर्वेदेसु विविधोद्योमकर्मकर्तुणां स्पष्टोल्लेखः प्राप्यते। यथा – सूतः, शैलूषः, रथकारः, तक्षा, कौलालः, कर्मारः, इषुकारः, धनुष्कारः, ज्याकारः, रज्जुनिर्माता, मृगयुः, श्वनी, भिषक्, हस्तियः, अश्वपः, गोपालः, अविपालः, अजपालः, सुराकारः, हिरण्यकारः, वणिकादयः। इमे मिलित्वा प्रयोविशतिसङ्स्यकाः उद्योगकाराः आसन्। अस्मिन्नुद्योगेषु समाजस्य विविधवर्गाणां प्रतिबिम्बं दृश्यते। तानार्थिकदृष्टया विभिन्नश्रेणिषु स्थानं प्रदत्रम्। विविधोद्योगानां विभागाः –

मणिकारः, शैलूषः, कौलालः, अविपालः, अंजपालश्च। रज्जुनिर्माता, मृगयुः, धनीश्च।

वेदेषु यातायातयन्त्रषि

आधुनिकयुगवद् वेदकाले यातायातवाहनान्यपि बहुनि आसन। विविधप्रदेशानां पारस्परिकसंयोजनस्यावश्यकतावशात् यानव्यवहारस्य भूपृष्ठवाय्वादीनयाऽऽर्थिकंविकासाय अत्याधुनिकसाधनानि भवन्ति। यानव्यवहारं वाणिज्यस्यापि अभिन्नमङ्गमस्ति। पृथिव्याः उपरि सञ्चलित

अश्व-वृषभ-रथयानोपशन्तऋग्वेदे पृथिवीस्थितान्ययन्त्राणां सङ्केता अपिलभ्यन्ते । यथा -

अनश्वो जातो अनभीशुकध्यो[1]

रथस्त्रिचक्रः परिवर्तते रजः ।

ऋग्.४/३६/१

अर्थात् अश्वविहीनः, रथविहीनः, रज्जुविहीनः, चक्रविहीनश्च रथोल्लेखः प्रस्तुतमन्त्रे वर्तते

अनेनो वो मरुतो यामोऽस्तु अनश्वश्चिद् यमजत्यरथीः ।[2]

अनवसो अनीभश् रजस्तुः विरोदसी पथ्या याति साधन् ॥

अनश्वयुक्ताः अरथीयुक्ताश्च रथाः अनवसः अनभिशुः रथाः रजसतु पथ्यासाधन् याति ।

मरूतां रथे शभे शर्धः अभि प्रगायत

एषां रथाः स्थिराः सुसंकृताः ।

वृषणश्वेन वृषप्सुना वृषनाभिना रथेन आगतम् ।

बन्धुरेष रथेषु वः आतस्थौ ।

विद्युन्मद्भिः स्वर्कैः ऋष्टिमद्भिः अश्वपर्णैः रथे भिः आयनम् ।

वः रथेषु विश्वा भद्रा ।

वः अक्षः चक्रा समया विववृते ।

---

१. ऋग्वेद-४/३६/१

२. ऋग्वेद-३/६६/५

मरुतो रथेषु तस्थुषः एतान् कथा ययुः ।
युष्माकं रथान् अनु दधे ।
शुभं यातां रथा अनु अवृत्सत ।

ऋग्वेदीयमन्त्रार्थेन ज्ञायते अश्वपर्णैः पदस्यार्थोभवति अश्वस्थाने पर्णम्, विमानेषु वायुपूरितपर्णानि सिक्तापयुक्तप्रदेशे गमनशीलारथाः । तेषां रथेषु विश्वा भद्रा अक्षः चक्रा समया विववृते । शुभकर्मणि यातां रथाः अनु अवृत्सत । तदुपरि मृगसञ्चालितरथाः हिमाच्छादितप्रदेशेषुयुद्धावसरे गच्छन्ति स्म । रमे रथाः चक्ररहिताः भवन्ति स्म । यथा –

हिरण्यश्रृङ्गोऽयोऽस्य यादा मनोजवा ।
सुषमे शर्यणावति आर्जीके पस्त्यावति । ययुः निचक्रया नरः ॥

सु–सोमस्थले निश्चक्रयायुक्ताः रथाः ययुः । वर्तमानयुगे हिमाच्छादितप्रदेशेषु प्रचलितारथाः आङ्लभाषायां नाम्ना प्रसिद्धास्सन्ति ।

वर्णनमिदं लौहयुक्तचक्रयुतरथस्यास्ति, तस्योपरि सुवर्णशृङ्गानि भवन्ति, इमे रथाः मनोजवा वर्तन्ते । अस्मिन् रथे अग्नेः प्रयोगो भवति ।

वैदिकयुगे सिन्धुतटवर्तिप्रदेशस्थित जनानां पश्चिम एशियाखण्डस्थितदेशेषु व्यापार सम्बन्धः आसीत् । तत्र नौकायानस्यापि वर्णनं विद्यते । यथा –

सुनावमा रुहेयमस्त्रवन्तीमनागसम् । शतारित्राँ स्वस्तये ।[१]
सूत्रामाणं पृथिवीं धमनेहसं सुशमणिमदितिं सुप्रणीतम् ।
देवीं नावं स्वरित्रामनागस स्वस्तीमा रूहेमा स्वस्तये ॥[२]

---

१. यजुर्वेद–२२/७
२. ऋग्वेद–१०/६३/१०

अस्मिन् यानस्य वर्णने समुद्रान्तराले स्थित्वानाव: यान्ति तेभ्य: कृते हिरण्ययोशब्दप्रयोग: प्रकाशस्य द्योतक: वर्तते । कृतश्रवशब्दस्य तात्पर्यं वर्तते वार्तालापस्य श्रवणस्य च साधनानि भवन्ति तादृशं विमानम् । ऋग्वेदे अन्तीरक्षे तथा च समुद्रतले चलायमान नौकानामुल्लेखा: वैदिकसंस्कृते: विकासबोधं कारयन्ति । वैदिक परम्परायां शिल्पशास्त्रमपि विज्ञानशब्देन अभिधीयते । अमरकोशग्रन्थे कथितमसित यत् मोक्षे धीर्ज्ञानं, विज्ञानं शिल्पशास्त्रयो: । बृहदारण्यके –

यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद ।[१]
यस्य विज्ञानं शरीरं ये विज्ञान मन्तरो यमत्येष त आत्मान्तर्याम्यमृत ॥

अस्मिन् शिल्पसंहितानुसारेण पुष्पकविमानं वाष्पमाध्यमेन प्रचलति स्म । महाकवि कालेदासेनापि रघुवंशमहाकाव्ये पुष्पकविमानस्य वर्णनं कृतमस्ति यत् –

वेदेषु केवलं रथानां नौकानाञ्च वर्णनं नास्ति, अपितु नभोयानानामपि वर्णनं प्राप्यते । ऋग्वेदे अश्विनिकुमाराभ्यां वायुयानानां चर्चा नैकेषु स्थलेषु दृश्यते । यथा –

तुग्रो ह भुज्युं अश्विना उदमेहो रयिं न कश्चित् ममृर्दां अवाहा: ।[२]
तं ऊहथु: नौभि: आत्मवन्तीभि: अन्तरिक्षपुद्भि: अपादकाभि: ॥

पक्षिसदृशविमानानि । यथा – वय: इव मरूत: केनचित् यथा [३]
एतादृशानि विमानानि केनचिदपि मार्गै: गच्छन्ति । यथा

१. रघुवंश महा.४०
२. ऋग्वेद–१/११६/३
३. ऋग्वेद–१,८७, २

आ विद्युन्मदिभः मरुतः स्वर्कैः[1] रथेभिः यान ऋष्टिमदिभरश्वपर्णैः ।
आ वर्षिष्ठया न इषा वयः न पत्तत सुमायाः ॥

विद्युन्मद्भिः तेजयुक्ताः ऋष्ट्मिद्भिः अश्वपर्णैः शास्त्रास्त्रयुक्ताः किन्तु रथस्थाने पर्णयुक्ताः सुमायावयः न पप्तत ।

वयो न ये श्रेणी पप्तुरोजसा अन्तान् दिवो बृहतः सानूनस्परि ।
अश्वास एषामुभये यथा विदुः सं पर्वतस्य नभर्नुंरचुच्यपुः ॥

उपर्युक्तविमानानि वय इवोजसा श्रेण्यां प्रचलन्ति, दिवः अन्तान् बृहत्ः सानूनः परि परिपाततुः । एषामश्वाः नभनूरचुत्त्युवः । उपर्युक्तमन्त्रेषु यानानां गतिः, प्रकारश्च वर्णिताऽस्ति । अन्तरिक्षस्यान्तभागपर्यन्त खग इवु गतिः दृश्यते विमानानाम् । "वयः न श्रेणीः दिवः अन्तान् परिपप्ततुः" । विषयेऽस्मिनन्यानि प्रमाणान्यपि सन्ति । यथा –

यत् अक्तून वि, अहानि वि, अन्तरिक्षें वि, रजांसि विअजथ ।
यथा नावः दुर्गाणि वि मरूतो न रिष्यथ ॥

अर्थात् यदा त्वं रात्रौ दिने वान्तरिक्षे गन्तुं समर्थो भवेत्तदा रजोलोकन्नृलोकासदृशं तव गमनं दृश्यते । गमनकाले कठिनप्रदेशेऽपि अविरतगत्या ते प्रयाणं भवति । यथा –

उत अन्तरिक्षं ममिरे व्योजसा ।
आ अक्ष्णयावानो वहन्ति अन्तरिक्षेण पततः ॥[2]

---

१. ऋग्वेद–५/५५/२
२. ऋग्वेद–२/७/३५

अर्थात् स्वशक्त्याऽम्बरं ममिरे । अन्तरिक्षेण पतत: अक्षणयावानों वहन्ति । तथा च

आ यात मरूतो दिव आ अन्तरिक्षात् अमात् उत ।
श्येनानिव ध्रुजत: अन्तरिक्षे ।
ये यावृधन्त पार्थिवा ये उरौ अन्तरिक्षे आ ।
वृजेन वा नदीनां स्धस्थे वा मह: दिव: ॥

उपर्युक्तान्युदाहरणानि वायुयानस्य विमानस्य वौपदेशं कुर्वन्ति । वेदेषु निर्दिष्टयानानि जले, स्थले, नभोमण्डले च समानरीत्या प्रचलिन्त स्म ।

ऋग्वेदे विभिन्नोद्योगानां वर्णनमिव तस्मिन्युगे यातायातायानानि सङ्गपठितरीत्या विकसितानि सन्ति । सङ्गठनं विना उद्योगा: कदापि विकासं न प्राप्नुवन्ति । बौद्धकाले ई.पू.६०० तथा च यजुर्वेदवर्णिता: उद्योगा: सङ्गगठिता आसन् । तात्पर्यं वर्तते वैदिकयुगे वाणिज्यक्षेत्रे उद्योगक्षेत्रे च उपर्युक्तपद्धत्यनुसारेण विकास: जात: इति निश्चप्रचम् ।

### ६.६.४ वेदेषु आयुर्विज्ञानम् :

**वेदेषु आयुर्वेद: !**

वैदिक साहित्यं कृष्णद्वपायनेन वेदव्यासेन प्रगृह्य स्वल्यशेमुषीनां मानवानां कृते चतुर्षु भागेषु विभक्त: । वेदानामुपवेदाङपि चत्वार एव वर्तन्ते । आयुर्वेद:, धनुर्वेद, गन्धर्ववेद:, शिल्पवेदश्च । उपवेदेषु चतुष्वायर्वेदस्य प्रथमं स्थानम् । सप्तसु पर्वसु आयुर्वेदोऽपि । विभक्त: । चिकित्सा पद्धतेश्च विंशतिरङ्गानि सन्ति । तथा चाऽयुर्वेदे सप्तपर्वाणि सन्ति, यथा – अश्वायुर्वेद:, मनुष्यायुर्वेद:, गवायुर्वेद:, हस्तत्यायुर्वेद:, छात्रायुर्वेद:, शुकायुर्वेद:, वृक्षायुर्वेदश्च । वैदिकर्षय:

दीर्घायुष्यकर्तुमुपदिशन्ति । तेषां मनसि विश्वासोऽयं विद्यते यद् – आचारविचारेण, आहारेण च आयुर्विद्धिः भविष्यति । यदि केनापि कारणेन रोगाणामाक्रमणं भवेतर्हि औषद्भिः तेषां प्रतीकारं कर्तुं शक्यते ऋग्वेदे नैकेषु मन्त्रेषु औषधिना रोगनिवारणोपायाः प्रतिपादितास्सन्ति । यथा –

ओषधीः प्राचुच्युवुर्यत् किंच तन्वो रवः[1]

वीरुधीः पारयिष्ठावः[2]

ओषधयः रोगान्निवृत्तिमवाप्नुवन्ति ।[3]

यं जीवमश्नवामहै न स रिष्यति पुरूषः

अहमोषधीं हस्ते गृहणामि

येन रोगाः समूलं नश्यनित ।[4]

तासां त्वमस्युत्तमाऽरं

कामाय शं हृदे ॥

चरकसंहिता, सुश्रुतसंहिताऽष्टाङ्गहृदयभावप्रकाशादयः प्रसिद्धाः आयुर्वेदाग्रन्थाः सन्ति, एतेषु सर्वेषु वैदिकारोग्यमन्त्री ओषधीभ्यः रूग्णावस्थां दूरीकर्तुं समर्थः दरीदृश्यते वेदादिषु –

यक्षमनाशनम्

ऋग्वेदे रोगस्य पर्यायवाचिशब्दः यक्षममस्ति । ऋग्वेदस्य नैकमन्त्रेक्षु तस्योल्लेखः प्राप्यते । यथा –

---

१. ऋग्वेद–१०/९७/१०

२. ऋग्वेद–१०/९७/३

३. ऋग्वेद–१०/९७/१५

४. ऋग्वेद–१०/९७/१८

ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ।

वेदानां प्राच्यार्वाच्यभाष्यकारैः आयुर्वेदस्य ज्ञानाभावात् राजयक्ष्मा(क्षयः) मदः कथितः यः सर्वथैवाऽवशुद्धः । अथर्ववेदस्य तृतीयकाण्डस्य एकादशसूक्ते वर्णनमस्ति यत् – अज्ञातयक्ष्माद्धुत राजयक्ष्मात । अत्र राजयक्ष्मा सहाज्ञातयक्ष्मापदं यक्ष्माशब्दस्य मूलार्थः नास्ति । अथर्ववेदस्य ९/८/२० । मन्त्रे यक्ष्माणां सर्वेषां पदं सिद्धयति यदे वेदाः यक्ष्मापदे –

**रोगोत्पतेः कारणाति :**

वेदेषु गदस्य त्रीणि कारणानि प्रतिपादितानि सन्ति । प्रथमं शरीरान्त स्थित विषेन शमैः शनैः संचितविकाराः, द्वितीयं शरीरे कृममम्युत्पादनं, तृतीयं त्रिदोषाः वातपित्तकफादयः । रोगाणां द्वितीयकारण–कृम्युत्पादन विषये ऋग्वेदे वर्णनमस्ति यत् अग्निं संप्रार्थ्यकतिथमस्ति –

अदाभ्येन शो चिषाऽग्ने रक्षस्त्वं दह ।

हे अग्नि त्वं स्वकीयतेजसा रोगोत्पत्तेकारणभूतकृमींनश्यत ।

अथर्ववेदेऽपि कथितमस्ति यत् अन्न–जल–दुग्धादिपदार्थेषु प्रविश्य कृमी शरीरे मानवं रोगग्रस्तं करोति । उच्छिष्टपात्रे भोजनं क्रियते चेत्तदा तत्रस्थितकृमी शरीरे प्रविश्य गदं करोति ।

ऋग्वेदे राजयक्ष्मारोगाणां कृमी यक्षिसदृशाऽन्य शरीरे प्रविशन्ति । इमे स्त्रीभ्यः मृतवत्सा वा वन्ध्याकरणस्य कारणानि सन्ति । कीटकाः उदरस्थितकीटकाः, कीटजीवाश्च वेदे कृमीपदेन प्राप्यन्ते । कीटकाः अच्छिष्टपात्रस्थितदुग्धपानेन मातुः दुग्धं विनश्यन्ति, गर्भाशये प्रविश्य वा यौनौ प्रविश्य गर्भपातं कारयन्ति, गर्भं वा नश्यन्ति । स्त्रियः मृतवत्सा वा वन्ध्या

भवन्ति । रुधिरपायिन्यः कीटकाः शरीरवृधिं निरोधयन्ति । चक्षुषिं, नासिकायां दन्ते प्रविश्यकीटका मस्तिष्कं मानसिकरोगैः प्रतडन्ति । आर्युक्त रोगोत्पादक कीटकानां वर्णनानि ऋग्वेदे अथर्ववेदे च प्राप्यन्ते ।

विश्र्वेस्मिन् सूर्यरश्मेः पवित्रतायाः सर्जनं भवति । यः जनः सूर्यरश्मेः उपयोगं करोति स आरोग्ययुक्तो भवति । वेदेषु सूर्यरश्मयः शब्देन परमाणुभिः इत्ययर्थः सूच्यते । परामणुना एटमिकन्युग्लिई स्वरया प्रसिद्धः वर्तते । यानि विकरणानिबाहयावकाशतः अस्मान् आवहन्ति । तैः विकरणैः सूर्यस्य वातावरणं स्थिरीभवति । ऋग्वेदस्य प्रथममण्डलस्य पञ्चाशततमे सूक्ते वर्णनं विद्यते । यत् –

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ।[१]
हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥

अर्थात् सूर्यरश्मयः हृद्रोगतं वं समूलं विनश्यति । प्रश्नोपनिषदि सूर्यं जगत्प्राणशक्तिस्वरूपेण वर्णनं कृतमस्ति । प्राणः प्रजानामुदयत्येष सूर्यः । यजुर्वेदे जगदात्मस्वरूपेण सूर्यस्य वर्णनं प्राप्यते । ''सूर्य आत्मा जगतः''[२]

अथर्ववेदानुसारेण सूर्यरश्मयः हृद्रोगं, पाण्डुरोगं शीर्षक्तिकर्णशुल अङ्गेज्वरमूत्र रोग पार्श्र्वशूल आन्त्ररोगविदध्रिहरिमाहलीमकादिरोगान् समूलं नश्यन्ति ।

वैदिकऋषयः सौरऊर्जायाः परिज्ञातारः आसन् ।

---

१. ऋग्वेद–१/५०/१३
२. यजुवेद–७/४२

तत् स्पष्टम् –

जरायुजः प्रथम उस्त्रियो वृषा वातभ्रजा स्तनयन्नेति वृष्ट्या ।[१]
स नो मृडानि तन्वऽऋजुगो रूजन् य एक मोजस्त्रेधा विचक्रमे ॥

सौरऊजाविषये सूर्यस्य विविधनामाभिधानं वेदे प्राप्यते । यथा –

अग्निः, अजशृङ्गी, अपामार्गः, गुग्गुलुः, नलदी, प्रश्नीपर्णिः, शतावरः, सहस्रचक्षुः, इत्यादयः ।

इत्थं सौरऊर्जा मानवकल्याणकृत् वरिवर्ति । वैदिकवाङ्मये सौरऊर्जाविदः ऋषयः प्राचीनतमा वैज्ञानिका सन्तीति निश्चितम् ।

**औषधविज्ञानम्**

प्राचीनकाले आधुनिकयुगवत् रोगशान्त्यै प्राय उद्भिजानां प्रयोगः क्रियते स्म, तेषां रोगनाशको रसः ओषः उच्चते, ओषधारणाद् वनस्पतिरोषधिरूच्यते – यथा

ओषो नाम रसः सोऽस्यां धीयते यत् तदौषधिः ।
ओषादारोग्यमाऋते तस्मादोषधिरोषधः ॥

वाजीकरण सपत्ननाशनविधवाकरणा धौपनिषदि कप्रयोजनेष्ययि भवत्यौषधप्रयोगः । प्राकृतिक खनिज–सामुद्रज– प्राणिजोद्भिजद्रव्यानाम् औषधरूपेण प्रयोगो भवति ।

१. अथर्ववेद–१/१२/३

ऋग्वेदस्य साक्ष्येण ज्ञायते यदावश्यकतानुसार मा विष्कृता क्षोषध्यो वनक्षेत्रेषु वाद्विकासु वा कृष्यन्ते । कथ्यते यत् सर्वप्रथमं बृहस्पतिना उत्पादिता नानाविधौषध्यः तदुक्तं । यथा –

या: फलिनीर्या, अफला अपुष्पा याश्च पुष्पिणीम् ।
बृहस्पतिप्रसूतास्तानो मञ्चन्त ध हसः ॥

धृतदुग्धादिवन्मधुपयोगोऽपि पौष्टिकमायुष्यवर्धकं च । मानवीयाऽहारे यज्ञीयेहविष्ये औषधीयप्रयोगे क्षेत्रकर्षणे च मधुप्रयोगस्य नैकानि निदर्शनानि ऋग्वेदेषु प्राप्यन्ते । सीता नद्यः ओषधयः वायुमण्डलञ्च सर्वाण्येव मधुराणि स्युरित्यभिलाषा वैदिकर्षयः कुर्वन्ति । तद्यथा –

मधुजाता ऋतायते मधुक्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ।
मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः ।
मधुद्यौरस्तुनः पिता
मधुमान्नोजनस्पत्तिर्म्मधुमाँऽअस्तु सूर्य्यः ।
माद्ध्वीर्ग्गावो भवन्तुनः ॥
आयुर्वेदे गुग्गुलः, बहुगणः स्मृतः, तद्यथा
भग्नसन्धानकृद् वृष्यः सूक्ष्मः स्वर्यो रसायनः ।
दीपनः पिच्छिलो बल्यः कफवानफणापची: ।
मेदमेहाश्चवाताश्च क्लेदकुष्ठाममारूतान् ।
पिडकाग्रन्थिशोकाशोगण्डमालाकृमीञ्जयेत् ।
माधुर्याच्छमयेद्वाजं कषायत्वाच्च पित्तहा ॥

तिक्तत्वात् कफजितेन गुग्गुल: प्रोक्त, शुष्को दुर्गन्धयुक्त: त्यक्तप्रकृति वर्णको वीर्यवर्जित: पुराणो विज्ञेय: ॥

औषध्य: जीवनप्रदानकर्त्रीरस्ति । सुचारूरूपेण प्रयुक्तौषधी:, कदापि निष्फल न भवति । औषधिभि: सर्वरोगा: कृमिप्रभावश्च नश्यति । औषधिसेवनेन दीर्धायुष्यत्वं निरामयत्वञ्च लभते नर: । भिषकस्य बलम् ओषधि: वर्तते । यस्य गृहे ओषधय: वर्तन्ते तथा च यो जन: तस्य सम्युपयोग: कर्तुं प्रभवति स: बुद्धमान् भिषक् । यस्मिन्काले वैद्य: हस्तौ ओषधिं धारयति तस्मात्कालादेव रोगा: प्रलायनं कुर्वन्ति । यथा –

विप्र: स उच्यते भिषग् रक्षोहामीवचातन: ।[१]

शतं ते राजन् भिषज: सहसम् ।[२]

भिषक् स्वजीवनयात्रायै औषधिभि:, धनं, गौ:, अश्वा: वस्त्रादि प्राप्नोति । स: जगत: रक्षकत्वेन प्रतिष्ठित: । चिकित्सा माध्यमेन स: सर्वेषां रक्षणं, सुखञ्च प्रददाति । विदान् वैद्य: चिकित्साद्वारा यस्य सेवां करोति स: रोगान्निर्मुक्तो भवति ।

ओषधीनां कृते विशेषणामस्ति यत् अपक्रीता यस्यार्थौं भवति इमेऽमूल्यानि सन्ति । अर्थाद् क्रयणेन तस्य प्राप्तिर्न भवति । यद्यपि विनिमयपद्धत्या तस्य प्राप्तेरूल्लेखा: प्राप्यन्ते । यथा – कुष्ठौषधि:, वरुणावती, पवसा, मृगचर्मा च प्राप्यते । तेषु गौ:, अजा, अविं, वराह:, नकुल:, सर्प:, गन्धर्व: गरुड, हंसेत्यादि । वेदेषु वाजीकरणं गर्भाधानप्रकरणञ्च विशदतया प्राप्यते ।

---

१. ऋग्वेद–१०/९७/६

२. ऋग्वेद–१/२४/९

इत्थं वेदेषु रोगनिवारणाय औषधिरूपेण प्राकृतिद्रव्यानां, खनिजद्रव्यानां सामुद्रजद्रव्येषु सूखः । प्राणिजद्रव्यानाम् उद्भिजद्रव्यानां वनस्पत्यादीनाञ्च वर्णनानि सन्ति । उपचारार्थे मणिबन्धस्य प्रयोगोऽपि भवति स्म । यथा – सूर्यकान्तादिमणयः न अपितु वनस्पतेः मणयः । यानि रोगनिवारकानि, शत्रुहन्त्री, बलवर्द्धकानि च भवन्ति ।

इत्थमत्र षष्ठप्रकरणे वैदिकवाङ्मये आधुनिकसमाजव्यवस्थायाः विचाराः कीदृशाः स्युरिति, वर्तमानसमस्यायाः कृते विश्वशान्त्यै आधुनिकविचाराः, दुर्व्यसनानां कृते द्यूतकीडानिषेधद्वारा, अतिथिसत्कारद्वारा समभावविचारः, मूल्यवादिसमाजव्यवस्था, साम्यवादिसमाजव्यवस्था, एतैः सह मानवानां जीवनं सुखसुविधासमवेतं कथं सम्भवेत् तदिह षष्ठोपप्रकरणे ज्ञानविज्ञानादिभिः मानवसमाजस्य कृते आधुनिकदिशानिर्देशे कृषिविज्ञान, पशुपालनं, यान्त्रिकविज्ञानं, आयुर्विज्ञानम् इत्याख्यं विविद्ध आधुनिकविचारस्वरूपं चेतसा भूरि यथामति समीक्ष्य सर्वमत्र सुचारूतया निरूपयितुं प्रयासो विहितोऽपि । इतोऽप्यधिकं सविशदं सविस्तरं समीक्षादृष्ट्या व्याख्यातुं शक्यते । किन्तु अतिविस्तारभयादत्त प्रकरणमिदं समाप्यते ।